श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेङ्कटाध्वरि विरचितम्

# ॥ श्रीलक्ष्मीसहस्रम् ॥

## ॥ ऐश्वर्यस्तबकः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ ऐश्वर्यस्तबकः ॥

विश्वस्य जननीमेव विश्वस्य शरणं वृणे।
विश्वेश्वरसमैश्वर्यां विदुर्यां ब्रह्मवादिनः॥ १ ॥

अनुपाधिकमम्ब ते मुरारेः अपि साधारणमाहुरीशितृत्वम्।
स्फुटमत्र निदर्शनं प्रतीमो ननु मित्रावरुणादिदेवतात्वम्॥ २ ॥

अविशेषमशेषशेषिभावं युवयोर्यद्यपि वर्णयन्ति सन्तः।
तनये जलधेर्मिथः प्रतीतस्तदपि स्वामिनि शेषशेषिभावः॥ ३ ॥

तुल्येऽपि ते नाथविशेषणत्वे व्यक्तं गुणादस्ति विशेष एषः।
प्रत्यक्त्वमब्धेस्तनये भवत्याः प्राज्ञा गुणानां च पराक्त्वमाहुः॥ ४ ॥

संसाराब्धौ मज्जतां सज्जनानां रक्षायज्ञे दीक्षितो राक्षसारिः।
अम्भोराशेः पुत्रि पत्न्यास्तवासावन्वारम्भं नित्यमेत्यम्बुजाक्षः॥ ५ ॥

अस्येशानेत्यागमस्तावदास्तामैश्वर्येऽस्मिंस्तावदम्ब त्वदीये।
जागर्त्येव व्यासतातप्रणीतं श्लाघ्यं विष्णोस्तत् पुराणं प्रमाणम्॥ ६ ॥

जल्पाकास्ते जीवकोटिप्रवेशं स्वल्पप्रज्ञा ये रमे कल्पयन्ति।
विश्वं व्याप्तं विष्णुनाम्ब त्वया चेत्युक्तिस्तान् प्रत्युत्तरं शक्तिसूनोः॥ ७ ॥

वेदोद्याने पारिजातायमानं श्रीसूक्तं तज्जायतां श्रेयसे नः।
पारेवाचां भासुरे त्वत्प्रभावे चक्षुष्मन्तो देवि येनैव सन्तः॥ ८ ॥

दम्पत्योरिह युवयोरधीश्वरत्वं व्यासज्य स्थितिमिति संमतं मतं नः।
विश्वाम्ब श्रुतिविहितं विहाय पत्नीं कर्तृत्वं क्रतुषु न केवलस्य पुंसः॥ ९ ॥

दत्ताशयासु भवतीमहिमोपदेशे तत्तादृशीषु निगमान्तसरस्वतीषु।
नारायणप्रियतमे निखिलाभ्युपेतं रामायणं ननु जयत्युपबृंहणं नः॥ १० ॥

एका श्रीर्वै निगमशिखरैरिन्दिरे निर्विशेषं
 विश्वव्याप्तिर्जननि युवयोर्व्यक्तमुद्घुष्यमाणा।
ज्ञानद्वारा तव मधुरिपोरात्मनैवेत्यलीका
 वैषम्योक्तिः कुत उपनता हन्त केषाञ्चिदेषा॥ ११ ॥

वैभवं तव मुकुन्दपत्नि यो वेद वेदशिखरानुवर्णितम्।
वैभवं भुवि स विन्दति स्थिरं दुस्त्यजं त्यजति वै भवं ततः॥ १२ ॥

ऐश्वर्यमात्र मधुहन्तुरपह्नुते यो
 यो वा तवापि जगदम्ब तयोः प्रतीच्यः।
प्राच्यात् प्रदुष्यति विशिष्य पितृद्विषोऽपि
 मातृद्विषस्त्रिभुवने महती हि गर्हा॥ १३ ॥

श्रीमद्रामावरजसरणिं श्रेयसीमाश्रितानाम्
 आचार्याणामिह च कुहचिद्यस्तवाणुत्ववादः।
तस्याकूतं परमपुरुषप्रेप्सया तेऽब्धिकन्ये
 शेषत्वेन स्वत उपनतन्यूनतायां प्रतीमः॥ १४ ॥

राजन्वन्ति जगौ जगन्ति निगमो द्वाभ्यां युवाभ्यामपि
 द्वैराज्यं न हि तावता प्रसजति क्षीराम्बुधेरात्मजे।
आग्नावैष्णवशब्दभाजि यजनेऽधिष्ठानयुग्माश्रिताम्
 एकामेव हि देवतां सुमनसः शंसन्ति मीमांसकाः॥ १५ ॥

रामाकारे जनकतनया रुक्मिणी कृष्णरूपे
 भर्तुः कृष्णाजिनमुपगता ब्रह्मचर्येऽपि पद्मे।
अन्तर्यन्तुः सकलजगतामच्युतादच्युतां त्वं
 धत्से मूर्तिं तदिह युवयोः प्रस्फुटो नित्ययोगः॥ १६ ॥

क्रियायां भव्यायां कृतरुचिरमार्गं परिहरन्
 अकम्पं विश्रम्भं विदधदभिरक्षेदियमिति।
व्यवस्यन् गोप्तृत्वं व्यपसरदुपायान्तरकथो
 भवत्या संश्लिष्टे भगवति निदध्यान्निजभरम्॥ १७ ॥

न्यासक्रियाकरणमन्त्रपदानुरोधात्
　　उद्देश्यमात्महविषि स्वयमर्प्यमाणे।
वाराशिपुत्रि भवती विशिनष्टि नाथं
　　यागे महेन्द्रमखिलाम्ब यथा महत्त्वम्॥ १८ ॥

इच्छार्जितबहुदेहामिन्द्रादिपदप्रदावलोकलवाम्।
ईशानां लोकानामीडीमहि नियतमिन्दिरे भवतीम्॥ १९ ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे ऐश्वर्यस्तबकः ॥